श्रीवरवरमुनिभिरनुगृहीता

## ॥ यतिराजविंशतिः ॥

**यः स्तुतिं यतिपतिप्रसादिनीं व्याजहार यतिराजविंशतिम् ।**
**तं प्रपन्नजनचातकाम्बुदं नौमि सौम्यवरयोगिपुङ्गवम् ॥**

श्रीमाधवाङ्घ्रिजलजद्वयनित्यसेवाप्रेमाविलाशयपराङ्कुशपादभक्तम् ।
कामादिदोषहरमात्मपदाश्रितानां रामानुजं यतिपतिं प्रणमामि मूर्ध्ना ॥१॥

श्रीरङ्गराजचरणाम्बुजराजहंसं श्रीमत्पराङ्कुशपदाम्बुजभृङ्गराजम् ।
श्रीभट्टनाथपरकालमुखाब्जमित्रं श्रीवत्सचिह्नशरणं यतिराजमीडे ॥२॥

वाचा यतीन्द्र ! मनसा वपुषा च युष्मत्पादारविन्दयुगलं भजतां गुरूणाम् ।
कूराधिनाथकुरुकेशमुखाद्यपुंसां पादानुचिन्तनपरस्सततं भवेयम् ॥३॥

नित्यं यतीन्द्र ! तव दिव्यवपुस्स्मृतौ मे सक्तं मनो भवतु वाग्गुणकीर्तनेऽसौ ।
कृत्यं च दास्यकरणं तु करद्वयस्य वृत्त्यन्तरेऽस्तु विमुखं करणत्रयं च ॥४॥

अष्टाक्षराख्यमनुराजपदत्रयार्थनिष्ठां ममात्र वितराद्य यतीन्द्र नाथ ! ।
शिष्टाग्रगण्यजनसेव्यभवत्पदाब्जे हृष्टाऽस्तु नित्यमनुभूय ममास्य बुद्धिः ॥५॥

अल्पाऽपि मे न भवदीयपदाब्जभक्तिश्शब्दादिभोगरुचिरन्वहमेधते हा ।
मत्पापमेव हि निदानममुष्य नान्यत्तद्वारयार्य यतिराज ! दयैकसिन्धो ! ॥६॥

वृत्त्या पशुर्नरवपुस्त्वहमीदृशोऽपि श्रुत्यादिसिद्धनिखिलात्मगुणाश्रयोऽयम् ।
इत्यादरेण कृतिनोऽपि मिथः प्रवक्तुरद्यापि वञ्चनपरोऽत्र यतीन्द्र ! वर्ते ॥७॥

दुःखावहोऽहमनिशं तव दुष्टचेष्टश्शब्दादिभोगनिरतश्शरणागताख्यः ।
त्वत्पादभक्त इव शिष्टजनौघमध्ये मिथ्या चरामि यतिराज ततोऽस्मि मूर्खः ॥८॥

नित्यं त्वहं परिभवामि गुरुं च मन्त्रं तद्देवतामपि न किञ्चिदहो बिभेमि ।
इत्थं शठोऽप्यशठवद्भवदीयसङ्घे धृष्टश्चरामि यतिराज ततोऽस्मि मूर्खः ॥९॥

हा हन्त हन्त मनसा क्रियया च वाचा योऽहं चरामि सततं त्रिविधापचारान् ।
सोऽहं तवाप्रियकरः प्रियकृद्वदेव कालं नयामि यतिराज ! ततोऽस्मि मूर्खः ॥१०॥

पापे कृते यदि भवन्ति भयानुतापलज्जाः पुनः करणमस्य कथं घटेत ।
मोहेन मे न भवतीह भयादिलेशस्तस्मात्पुनःपुनरघं यतिराज ! कुर्वे ॥११॥

अन्तर्बहिस्सकलवस्तुषु सन्तमीशमन्धः पुरस्स्थितमिवाहमवीक्षमाणः ।
कन्दर्पवश्यहृदयस्सततं भवामि हन्त त्वदग्रगमनस्य यतीन्द्र ! नार्हः ॥१२॥
तापत्रयीजनितदुःखनिपातिनोऽपि देहस्थितौ मम रुचिस्तु न तन्निवृत्तौ ।
एतस्य कारणमहो मम पापमेव नाथ ! त्वमेव हर तद्यतिराज ! शीघ्रम् ॥१३॥
वाचामगोचरमहागुणदेशिकाग्र्यकूराधिनाथकथिताखिलनैच्यपात्रम् ।
एषोऽहमेव न पुनर्जगतीदृशस्तद्रामानुजार्य करुणैव तु मद्गतिस्ते ॥१४॥
शुद्धात्मयामुनगुरूत्तमकूरनाथभट्टाख्यदेशिकवरोक्तसमस्तनैच्यम् ।
अद्यास्त्यसङ्कुचितमेव मयीह लोके तस्माद्यतीन्द्र ! करुणैव तु मद्गतिस्ते ॥१५॥
शब्दादिभोगविषया रुचिरस्मदीया नष्टा भवत्विह भवद्दयया यतीन्द्र ! ।
त्वद्दासदासगणनाचरमावधौ यस्तद्दासतैकरसताऽविरता ममास्तु ॥१६॥
श्रुत्यग्रवेद्यनिजदिव्यगुणस्वरूपः प्रत्यक्षतामुपगतस्त्विह रङ्गराजः ।
वश्यस्सदा भवति ते यतिराज ! तस्माच्छक्तस्स्वकीयजनपापविमोचने त्वम् ॥१७॥
कालत्रयेऽपि करणत्रयनिर्मितातिपापक्रियस्य शरणं भगवत्क्षमैव ।
सा च त्वयैव कमलारमणेऽर्थिता यत्क्षेमस्स एव हि यतीन्द्र भवच्छ्रितानाम् ॥१८॥
श्रीमन्यतीन्द्र ! तव दिव्यपदाब्जसेवां श्रीशैलनाथकरुणापरिणामदत्ताम् ।
तामन्वहं मम विवर्धय नाथ ! तस्याः कामं विरुद्धमखिलं च निवर्तय त्वम् ॥१९॥
विज्ञापनं यदिदमद्य तु मामकीनमङ्गीकुरुष्व यतिराज दयाम्बुराशे !
अज्ञोऽयमात्मगुणलेशविवर्जितश्च तस्मादनन्यशरणो भवतीति मत्वा ॥२०॥

**इति यतिकुलधुर्यमेधमानैः श्रुतिमधुरैरुदितैः प्रहर्षयन्तम् ।**
**वरवरमुनिमेव चिन्तयन्ती मतिरियमेति निरत्ययं प्रसादम् ॥**
**इति यतिराजविंशतिस्समाप्ता ॥**

---

श्रीदेवराजगुरुभिरनुगृहीता

## ॥ उत्तरादिनचर्या ॥

अथ गोष्ठीं गरिष्ठानामधिष्ठाय सुमेधसाम् । वाक्यालङ्कृतिवाक्यानां व्याख्यातारं नमामि तम् ॥१॥
सायन्तनं ततः कृत्वा सम्यगाराधनं हरेः । स्वैरालापैः शुभैश्श्रोतॄन्नन्दयन्तं नमामि तम् ॥२॥
ततः कनकपर्यङ्के तरुणद्युमणिद्युतौ । विशालविमलश्लक्ष्णतुङ्गतूलासनोज्ज्वले ॥३॥
समग्रसौरभोद्गारनिरन्तरदिगन्तरे । सोपधाने सुखासीनं सुकुमारे वरासने ॥४॥